# Dharmakritam 1 Shiva Stotram

# ધર્મકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Dharmakritam 1 Shiva Stotram

File name : dharmakRRitaM1shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 78/32-41||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# ધર્મકૃતં ૧ શિવસ્તોત્રમ્

ધર્મ ઉવાચ ।
નમો નમઃ કારણકારણાનાં નમો નમઃ કારણવર્જિતાય ।
નમો નમઃ કાર્યમયાય તુભ્યં નમો નમઃ કાર્યવિભિન્નરૂપ ॥ ૩૨॥

અરૂપરૂપાય સમસ્તરૂપિણે પરાણુરૂપાય પરાપરાય ।
અપારપારાય પરાબ્ધિપારપ્રદાય તુભ્યં શશિમૌલયે નમઃ ॥ ૩૩॥

અનીશ્વરસ્ત્વં જગદીશ્વરસ્ત્વં ગુણાત્મકસ્ત્વં ગુણવર્જિતસ્ત્વમ્ ।
કાલાત્પરસ્ત્વં પ્રકૃતેઃ પરસ્ત્વં કાલાય કાલાત્પ્રકૃતે નમસ્તે ॥ ૩૪॥

ત્વમેવ નિર્વાણપદપ્રદોઽસિ ત્વમેવ નિર્વાણમનન્તશક્તે ।
ત્વમાત્મરૂપઃ પરમાત્મરૂપસ્ત્વમન્તરાત્માસિ ચરાચરસ્ય ॥ ૩૫॥

ત્વત્તો જગત્ત્વં જગદેવ સાક્ષાજ્જગત્ત્વદીયં જગદેકબન્ધો ।
હર્તાવિતા ત્વં પ્રથમો વિધાતા વિધાતૃવિષ્ણ્વીશ નમો નમસ્તે ॥ ૩૬॥

મૃડસ્ત્વમેવ શ્રુતિવર્ત્મગેષુ ત્વમેવ ભીમોઽશ્રુતિવર્ત્મગેષુ ।
ત્વં શઙ્કરઃ સોમસુભક્તિભાજામુગ્રોઽસિ રુદ્ર ત્વમભક્તિભાજામ્ ॥ ૩૭॥

ત્વમેવ શૂલી દ્વિષતાં ત્વમેવ વિનમ્રચેતો વચસાં શિવોઽસિ ।
શ્રીકણ્ઠ એકઃ સ્વપદશ્રિતાનાં દુરાત્મનાં હાલહલોગ્રકણ્ઠઃ ॥ ૩૮॥

નમોઽસ્તુ તે શઙ્કર શાન્તશમ્ભો નમોઽસ્તુ તે ચન્દ્રકલાવતંસ ।
નમોઽસ્તુ તુભ્યં ફણિભૂષણાય પિનાકપાણેઽન્ધકવૈરિણે નમઃ ॥ ૩૯॥

સ એવ ધન્યસ્તવ ભક્તિભાગ્યસ્તવાર્ચકો યઃ સુકૃતી સ એવ ।
તવ સ્તુતિં યઃ કુરુતે સદૈવ સ સ્તૂયતે દુશ્ચ્યવનાદિ દેવૈઃ ॥ ૨.૭૮.૪૦॥

કસ્ત્વામિહ સ્તોતુમનન્તશક્તે શક્નોતિ માદૃગ્લઘુબુદ્ધિવૈભવઃ ।
પ્રાચાં ન વાચામિહગોચરો યઃ સ્તુતિસ્ત્વયીયં નતિરેવ યાવત્ ॥ ૪૧॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે અષ્ટસપ્તતિતમા- ધ્યાયાન્તર્ગતં

ધર્મકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૭૮/૩૨-૪૧ ॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 78/32-41..

Proofread by PSA Easwaran

---

*Dharmakritam 1 Shiva Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*